*IOSR Journal Of Humanities And Social Science (IOSR-JHSS)*
*Volume 20, Issue 3, Ver. 1 (Mar. 2015), PP 75-78*
*e-ISSN: 2279-0837, p-ISSN: 2279-0845.*
*www.iosrjournals.org*

# पाणिनीय कृत्यानुशासन विमर्शः

## प्रो. जयकान्त सिंह शर्मा

*श्रीलालबहादुर शास्त्री राष्ट्रिय संस्कृतविद्यापीठम्*

*कटवारिया सराय, नई दिल्ली*

**सारांश**

विदितमेव विदुषां यद्याकरणस्यान्वर्थं नाम शब्दानुशासनमिति, अनुशिष्यन्तेऽसाधुशब्दे- भ्यो विविच्य ज्ञाप्यन्तेऽनेनेति करणल्युडन्तेनानुशासनपदेन शास्त्रस्य समानाधिकरण्यम् । व्याकरणमपि असाधुशब्दावधिकसाधु-शब्दकर्मकपृथक्कृतिप्रयोजको नियमविशेषः । साधुशब्दान्वाख्यानमेतदीयं मुख्यं कृत्यम् । तत्रान्वाख्यानं प्रकृतिप्रत्ययविभागपूर्वकं व्युत्पादनमेव, वेदोऽपि शब्दान्वाख्यानरुपेण व्याकरणेन ज्ञायत इति छान्दोग्योपनिषद्युक्तं – "**वेदानां वेद**" इत्यादिना[1] । यद्यपि वाक्यमेव कञ्चना- पूर्वं पूर्णं निराकाङ्क्षं बोधं जनयति अतस्तदेकमनवयवं मन्यते तथापि पदपदार्थयोः प्रकृतिप्रत्यययो- स्तदर्थयोश्च कल्पना क्रियते शास्त्रीयप्रक्रियानिर्वाहायेति[2] । तत्र कल्पितावयवः प्रकृतिरूपः प्रत्ययरूपश्च। तत्र प्रत्ययनिष्ठविधेयतानिरूपितोद्देश्यतावच्छेदाक्रान्तत्वं प्रकृतित्वम्, प्रत्ययत्वं च प्रत्ययाधिकारे पठितत्वे सति पाणिनीयादि सङ्केत-सम्बन्धेन प्रत्ययपदवत्त्वम् । तत्र तिङन्तस्थत्वं विहाय प्रकृति- प्रत्ययौ सहार्थं ब्रूतस्तत्र प्रत्ययार्थस्यैव प्राधान्यमिति कश्चित्पक्षो विद्वत्सु प्रथते ।

## अमूर्त

पाणिनिनां स्वकीयव्याकरणे त्रिष्वध्यायेषु प्रत्यया अनुशिष्टाः, तत्रापि धातुमुद्दिश्य विहितेषु प्रत्ययेषु कृत्या इत्यधिकृत्य चित्याग्निचित्ये चेत्यन्तं कृत्यानुशासनं विहितम्, तत्र सप्तत्रिंशत् सूत्राणि विविधेष्वर्थेषु कृत्यप्रत्ययान् विदधति । '**कृत्याः**'[3] इति बहुवचनान्तमधिकारसूत्रम्, बहुवचनं तु तव्यदादीनां प्रत्ययगतबहुत्वाभिप्रायेण । कृत्येति सञ्ज्ञा च '**विभाषा कृवृषोः**'[4] इति सूत्रेण विहितेन वैकल्पिकक्यपा निष्पद्यते, अहो कृत्यप्रत्ययविधानाय कल्पितं कृत्याधिकारसूत्रमपि कृत्यप्रत्ययान्तम् इति कौतुकप्रियता सूत्रकारस्य । अत्राधिकारे प्रथमं '**तव्यत्तव्यानीयरः**'[5] इत्यनेन प्रत्ययत्रयं तदनु '**अचो यत्**'[6] इति यत्, '**वदः सुपि क्यप् च**'[7] इति क्यप् ।'**ऋहलोर्ण्यत्**'[8] सर्वमाहत्य पाणिनीयाः षट् प्रत्यया विहिताः । केलिमर् उपसङ्ख्यानमिति वार्तिकेनापि केलिमर् नामकः प्रत्ययो विहितः । '**चित्याग्निचित्ये च**'[9] सूत्रे अग्निचित्येत्यत्र यप्रत्ययोऽपि भाष्यकृता कृत्यतया सूचितः । अन्ते च वैदिकनिपातनानामाकल-नं दृश्यते ।

---

[1] छान्दोग्योपनिषद् -
[2] परमलघुमञ्जुषा, शक्तिप्रकरणे वर्णस्फोटलक्षणम्
[3] पा. सू. 3-1-95
[4] पा. सू. 3-1-120
[5] पा. सू. 3-1-96
[6] पा. सू. 3-1-96
[7] पा. सू. 3-1-106
[8] पा. सू. 3-1-124
[9] पा. सू. 3-1-132

यद्यपि कृत्याः प्रत्यया सार्वकालिका भवन्ति, अतः कर्तव्यमभूत् कर्तव्यम् अस्ति, कर्तव्यं भविष्यतीति त्रिषु कालेषु प्रयोगः सिद्ध्यति । कृत्प्रत्ययानां वर्गी-करणन्तु कालविभागाधारेण दृश्यते, अतः पूर्वं कत्रर्थकाः ण्वुल्तृचादयः कालसा-मान्ये विहिताः, ततः परं भूते इत्यधिकृत्य विहिताः प्रत्ययाः येन सोमेनेष्टवा- निति सोमयाजीत्यादौ भूते णिनिः क्विबादयश्च यथायथं भवन्ति । उत्तरकृदन्ते च गमिष्यति गम्यादय इत्युपक्रम्य भविष्यत्यर्थे प्रत्यया विहिताः, वर्तमाने लडि- त्यधिकारे वर्तमानार्थकाः प्रत्ययाश्च व्यधायिषत । भावार्थकानां तुमुन्क्त्वाघञा- दीनामपि विधानं तत्रैवास्ति इत्थं कृत्प्रत्ययानां विधानं कालाधारेण किन्तु कृदाधिकारे कृत्यानां वर्गीकरणन्तथा न, तद्विधानस्य क्रमो भिन्नः । प्रथममुत्सर्गशास्त्रं तदनु अपवादशास्त्रमित्येव सरणिः, तद्यथा **अचो यदि**ति उत्सर्गशास्त्रं पुनः **पोरदुपधादि**ति अपवादशास्त्रम् । पूर्वं तव्यत्तव्यानीयरां सामान्येन विधानं कृत्वा पुनः यत्-क्यप्-ण्यत् प्रत्ययानां क्रमशो विधानं दृश्यते । मध्ये मध्ये निपातन सूत्राणि तत्तत्प्रत्ययाधिकारे पठितानि, यदा वा **छन्दसि** इति सूत्रमायाति, तदानीं वैदिक रूपाणि पश्चादनुशिष्टानीति कश्चित्क्रमो निर्दिष्टः ।

वस्तुत इमे कृत्याः शुद्धेभ्यो धातुभ्यः सनाद्यन्तेभ्यश्च विधीयन्ते इत्यतः सन्-यङ्-क्यजादीनां धातुभ्यो विधानं पूर्वं कृतमष्टाध्याय्याम् । तेन सन्नन्त-चिकीर्षधातोर्यत्प्रत्ययविधाने चिकीर्ष्यमिति रूपं सम्पद्यते, अत एव **अचो यदि**ति सूत्रे अज्ग्रहणप्रयोजनं विचारितं टीकाकृतोक्तं यदत्र केचिदज्ग्रहणमजन्तपूर्वाद- पि यथा स्यादित्येवमर्थमपेक्षितम्,[10] तेन दित्स्यं धित्स्यमित्यत्र यति कृते यतोऽनाव इत्याद्युदात्तत्वं सिद्ध्यति, अन्यथा ण्यति कृते तित्स्वरितमिति प्रसज्येतेत्याहुः ।

अतः कृत्यानामनुशासनात्पूर्वं सन्नादीनां धातोर्विधानं युक्तन्तदनु काल सामान्ये विधेयानां कृत्यानां विधानं सङ्गतिप्राप्तम् । ण्वुल्तृजाद्यपेक्षया पूर्वं भाव-कर्मणोः कृत्यविधानं ततः पारिशेष्यात् कर्तरि तृजादिविधानं युक्तं सर्वथा । कृदनन्तरं तद्धितविधानं तु कृत्प्रत्यययोगान्निष्पन्नेभ्यो नामभ्यस्तद्धिता यथा स्युरित्येतदर्थम् । कृत्यप्रत्ययान्तादपि भावप्रत्यये तद्धिते रमणीयता भवितव्यता इत्यादिरूपाणां सिद्धिर्भवति ।

तव्यत्तव्यानीयरः केलिमर् प्रत्ययश्च धातुसामान्याद् विधीयन्ते, यथायथं सकर्मकेभ्यः कर्मणि, अकर्मकेभ्यश्च भावे, अतो धातुमात्राद् भावे कर्मणि च विहितास्तव्यादयः पूर्वं पठिताः, उत्सर्गस्य पूर्वमुक्तेरौचित्यात् । ततः परं धातून् अजन्त - हलन्तभेदेन प्रविभज्य पूर्वमजन्तेभ्यो यद् विहितः **अचो यदि**ति । ततो हलन्ताद् धातोर्ण्यदिति ऋहलोर्ण्यदिति । इत्थं सामान्यतो व्यवस्थाप्य पुनर-जन्तेषु ऋकारान्तेभ्यो ण्यत् प्रोक्तः, हलन्तेष्वपि पवर्गान्ताद् अदुपधाच्च धातोर्यदेव विहितः ।[11] अजन्तेष्वपि उकारान्तधातोरावश्यकत्वे द्योत्ये ण्यद् भवति ।[12] हलन्तेष्वजन्तेषु चैतीत्यादिभ्यः क्यब् विहितः ।[13] यत्र गुणवृद्धिनिषेधः तुक् सम्प्रसारणं वाभीष्टं तादृशेभ्यः क्यबनुशिष्टः, तत्रापि हलन्तेषु ऋदुपधाद् धातोः पुनर्न स एव विहितः । [14] प्रत्ययः **परश्चे**त्यनुशासनात्प्रत्ययस्य प्रकृतेः पर एव विधानं भवति ।

**<u>कृत्यप्रत्ययेष्वनुबन्धप्रयुक्तकार्याणि –</u>**

सानुबन्धप्रत्ययेषु तव्यत्-अनीयर्-यत्-ण्यत्-क्यप्-केलिमर् इत्येते षट् प्रत्ययाः सन्ति, निरनुबन्धकेषु प्रत्ययद्वयं विद्यते तव्य य च, तित्प्रत्ययेषु तव्यत्-यत्-ण्यदिति तथापि ण्यति णित्त्वनिबन्धनं वृद्ध्यादिकार्यं जायते, **केलिमरो[15]** रित्त्वात् कित्वाच्च

[10] सिद्धान्तकौमुद्यास्तत्त्वबोधिन्यां (कृदन्तकृत्यप्रकरणे अचो यत् इति सूत्रव्याख्याने पृ. 481)
[11] पोरदुपधात् (पा.सू. 3-1-98
[12] ओरावश्यके (पा.सू. 3-1-125
[13] एतिस्तुशास्वृदृजुषः क्यप् (पा.सू. 3-1-109
[14] ऋदुपधाच्चाक्लृपिचृतेः (पा.सू. 3-1-110
[15] केलिमर् उपसंख्यानम् (वार्तिकम्- सि.कौमुदी- कृत्यप्रक्रिया)

किन्निबन्धनो गुणवृद्धिनिषेधो रित्स्वरतया **उपोत्तमं रितीति**[16] सूत्रेण मध्योदात्तस्वरो भवति । अचो यदिति विहिते यति तकारस्तु

**यतोऽनाव**[17] इति स्वरार्थः, तेन जेयं काम्या इत्यादौ यत्प्रत्ययान्तानां द्व्यचाम् आदिरुदात्तो भवति । यतोऽनाव इति सूत्रं तित्स्वरितमित्यस्यापवादः, अत्र अनाव इति निषेधो ज्ञापयति स्वरविधौ व्यञ्जनविद्यमानवद् भवति । ण्यति तु ईडादीनां ण्यदन्तानामादिरुदात्तो भवति ।

**कृत्यार्थनिर्धारणम् –**

सामान्यतः कर्तरि कृदिति सूत्रोक्तमर्थं कर्तृरूपं प्रबाहध्यं **'तयोरेव कृत्यक्त- खलर्थाः'**[18] इति सूत्रेण कृत्यानां भावकर्मणी अर्थौ, तत्र '**लः कर्मणि चे**ति'[19] व्यवस्थयाऽकर्मकधातुभ्यो विधीयमानस्य कृत्यस्य भावोऽर्थः, सकर्मकधातुभ्यो विहितस्य कृत्यस्य कर्मार्थः । क्वचिच्छास्त्रनिर्देशात्तदतिरि- क्तेऽप्यर्थे कृत्यविधानं भवति । तद्यथा ब्रह्मणो हननं ब्रह्महत्येत्यत्र यः क्यप्[20] स भावे । यद्यपि हन् धातोः सकर्मकत्वात्कर्मणि क्यप् प्राप्तः । **'वसेस्तव्यत्कर्तरि णिच्च'**[21] इति वार्तिकेन वस् धातोर्विहितो णिद्विशिष्टस्तव्यत् कर्तरि विहितः, वसतीति वास्तव्यः । **भव्य-गेये**त्यादिसूत्रे[22] कर्तरीत्यस्यानुवर्तनात् तयोरेवेत्यनुशासनाच्च अकर्मकेभ्यो भावे सकर्मकेभ्यः कर्मणि यथाप्राप्तं पक्षे भवति पक्षे च कर्तर्यपि भवति, तेन भवतीति भव्य इत्यादिषु कर्त्तरि यत् "प्रवक्ति" इति प्रवचनीय इत्यत्र कर्त्तरि अनीयर् । बहुलनिर्देशादन्येष्वप्यर्थेषु कृत्यविधानं दृश्यते, कृत्यल्युटो बहुलमिति[23] सूत्रेण स्नात्यनेन स्नानीयं चूर्णम्, दीयतेऽस्मै दानीयो विप्र इत्यनयोः करणे सम्प्रदाने क्रमेणानीयर् । एवमेव उपजीव्यः, सरत्याकाशे सूर्य इति कर्तरि निपात्यते । कृष्टपच्या, भिदेलिमा इत्यादिषु कृत्यप्रत्ययः कर्मकर्तरीति वृतिकारः ।[24] उपजीव्यः, कर्म प्रोक्तवन्त इति कर्मप्रवचनीया[25] इत्यनयोः कर्तरि ण्यदनीयर् च भूते भवतः, तेन उपजीव्यविरोधः कर्मप्रवचनीया इति प्रयोगः सिद्ध्यति । भवितव्यानां द्वाराणि भवन्ति सर्वत्रेति[26] कालिदासीयप्रयोगः सङ्गच्छते । कृत्यप्रकरणे द्योत्यार्थानामपि निर्देशः साक्षात्सूत्रेषु लभ्यते, ये कृत्यान्त- प्रयोगेण द्योत्यन्ते । तद्यथा लाव्यमित्यत्र यो ण्यद् विहितः स 'ओरावश्यके' इति सूत्रेणावश्यम्भावे द्योत्ये निर्दिष्टः, एवमेव अर्हे कृत्यतृचश्चेति[27] सूत्रेण तव्यता अनीयरा वा तदर्हता योग्यता वा राम्यते त्वया कन्या वोढव्या, वहनीया वेति । शकि लिङ् चेति[28] सूत्रेण विहितकृत्येन सामर्थ्यं द्योतितं भवति । एवमेव प्रैषातिसर्गकाम- चाराप्राप्तकालादिषु प्रतीयमानेषु कृत्यप्रयोगस्तत्र तत्र विधीयते । बह्यं करणे[29] इत्यनेन वह्यं शकटमित्यत्र करणे, धीयतेऽनया ऋगिति धाय्या इत्यादौच करणे, लतात्मकः सोमो राजा सूयते कण्डयतेऽत्रेति क्यप् अधिकरणे विधीयते । शतं देयमित्यादौ आधमर्ण्यं गम्यते[30] समुदायोपाधि- तयापि

[16] पा.सू. 7-1-**117**
[17] पा. सू. 6-1-213
[18] पा. सू. 3-4-70
[19] पा. सू. 3-4-69
[20] पा. सू. 3-1-107 भुवो भावे
[21] वार्तिकम् सि. कौमुदी- कृत्य प्रक्रिया
[22] पा. सू. 3-4-68
[23] पा. सू. 3-3-113
[24] काशिकावृत्ति 3-1-104
[25] कर्मप्रवचनीया (1-4-63) इत्यत्र महाभाष्यम्
[26] अभिज्ञानशाकुन्तलम् 1-16
[27] पा. सू. 3-3-169
[28] पा. सू. 3-3-172
[29] पा. सू. 3-1-102
[30] आवश्यकाधमर्ण्ययोर्णिनिः(पा. सू. 3-3-170

केचनार्थाः निर्दिष्टाः, येषु कृत्यान्तस्य निपातनं दृश्यते तद्यथा उपसर्या काल्या प्रजने,[31] अजर्यं सङ्गतम,[32] युग्यं च पत्रे,[33] आनाय्योऽनित्ये,[34] पुष्यसिद्ध्यौ नक्षत्रे,[35] अर्यः स्वामिवैश्ययोः,[36] क्रतौ कुण्डपाय्यसञ्चय्यौ,[37] अग्नौ परिचाय्योपचाय्यसमूह्या[38] इत्यादिभिः सूत्रैस्तेऽर्थविशेषा निर्दिश्यन्ते ।

**ललितप्रयोगदृष्ट्या विचार:-**

संस्कृतभाषाकविभिरनुकूलतात्पर्यप्रकाशनाय तत्र तत्र कृत्यप्रयोगेण आनुगुण्यमन्वभावि, तद्यथा - रूपयौवनलावण्यस्पृहणीयतराकृतिरिति अप्पय्य- दीक्षितप्रयोगो भवतु, तदेव रूपं रमणीयताया इति माघप्रयोगो वा भवतु सर्वत्र कृत्यप्रयुक्तं सौष्ठवं केनापलपितुं शक्यते । लकारप्रयोगेऽदक्षोऽपि जन: कृत्य- प्रत्ययान्तेन विध्याद्यर्थविशेषप्रकाशने समर्थो भवतीति भाषायां कृत्यव्यवहार- पौष्कल्यं दृश्यत इत्येवमेतदीयबोधस्यानुपेक्षणीयता नितरामिति शम् ।

***

[31] पा. सू. 3-1-104
[32] पा. सू. 31-105
[33] पा. सू. 3-1-121
[34] पा. सू. 3-1-127
[35] पा. सू. 3-1-116
[36] पा. सू. 3-1-103
[37] पा. सू. 3-1-130
[38] पा. सू. 3-1-131